# Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam

# मुनिभिः कृता गोकर्णेशमीश्वरंशिवस्तुतिरेवं दक्षिणामूर्तिरूपस्य प्राकट्यम्

## Document Information

Text title : Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam

File name : gokarNeshamIshvaraMshivastutirevaMdakShiNAmUrtirUpasyaprAkaTyammunibhiHkRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 25||

Latest update : September 15, 2023

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# मुनिभिः कृता गोकर्णेशमीश्वरंशिवस्तुतिरेवं दक्षिणामूर्तिरूपस्य प्राकट्यम्

(शिवगौरीसंवादे)
ईश्वरः -
वसिष्ठाद्याश्च मुनयो वामदेवादियोगिनः ।
विश्वामित्रोऽङ्गिरात्रिश्च भरद्वाजोऽथ गौतमः ॥ १॥ (अङ्गिराश्चैव)

व्यासः पराशरो धौम्यः उचथ्यो भार्गवो मुनिः ।
सुमन्तुर्जैमिनिः पैलः कहोलो जमदग्निजः ॥ २॥

जैगीषव्यः श्वेतकेतुर्मन्युश्चैव महामुनिः ।
दुर्वासोद्दालको योगी सनातनसनन्दनौ ॥ ३॥

सनत्सुजातः सनकः तथा भृङ्गिरिटिर्मुनिः ।
उद्दालको हरीतश्च दत्तात्रेयोऽथ कश्यपः ॥ ४॥

मङ्कणः शकणो दाल्भ्यः शौनकस्तण्डवः कृशः ।
काशकृत्स्नश्चौडुलोमिः शिलादः पैप्पलायनः ॥ ५॥

बोधायनो मरीचश्च तथा चैवाश्वलायनः ।
एते चान्ये च मुनयो वेदवेदान्तपारगाः ॥ ६॥

भाष्याणि धर्मशास्त्राणि कल्पसूत्राणि सत्तमे ।
कृत्वाऽपि संशयापन्ना मां गोकर्णेशमीश्वरम् ॥ ७॥

संशयोच्छेदनं ज्ञानं मत्तो लब्धुं मुनीश्वराः ।
तपस्यन्ति महाभागे शुद्ध्यर्थं तपसः शिवे ॥ ८॥

शुद्धे मनसि च ज्ञानं प्रतिबिम्बति नान्यथा ।
पञ्चाग्निनिरताश्चान्ये कटधूमाशनाः परे ॥ ९॥

पर्णाशिनस्तथा केचिद्वायुवारिफलाशनाः ।
निराहारास्तथा केचित्केचित्पक्षोपवासिनः ॥ १०॥

कृच्छ्राणि केचित्कुर्वन्ति विविधानि सदाशिवे ।
गृहस्था यतयः केचिद्वानप्रस्थाश्च वर्णिनः ॥ ११॥

जटाजिनधरा मुण्डा भस्मरुद्राक्षभूषणाः ।
अग्निरित्यादिभिर्मन्त्रैः सर्वाङ्गोद्धूलने रताः ॥ १२॥

त्रिपुण्ड्ररेखाविलसद्भालभागमनोहराः ।
कौपीनाच्छादनैर्हीनाः केचित्कौपीनधारिणः ॥ १३॥

अश्मकुट्टास्तथा केचिद्दन्तोलूखलिनस्तथा ।
गोचर्मवसनाः केचित्केचिद्व्याघ्राजिनाम्बराः ॥ १४॥

अलाबुवैणवादीनि वाक्ष्यश्रृङ्गादिपात्रकैः । (वार्क्षास्यादिकपात्रकैः)
प्राणयात्रां प्रकुर्वन्ति मन्नैवेद्यैकभोजिनः ॥ १५॥

अयाचितास्तथा केचित्सप्तागारचराः परे ।
मन्नामनिरताः सर्वे मम लिङ्गार्चनप्रियाः ॥ १६॥

पञ्चाक्षरजपासक्ताः केचित्प्रणवजापकाः ।
भस्मनिष्ठाभस्मशय्यारुद्राध्यायजपादराः ॥ १७॥

लिङ्गार्चनपराः केचिद्बिल्वपत्रादिसाधनैः ।
केचिल्लिङ्गे नीरधारां कल्पयित्वा च संस्थिताः ॥ १८॥

रुद्राध्यायावर्तनैस्ते कालकालार्चने रताः ।
बिल्वमूलेषु लिङ्गानि पूजयन्त्यथ केचन ॥ १९॥

शिव शम्भो महादेव प्रसीदेति वदन्ति च ।
स्थानासनादिभिः केचित्केचिद्देव्यूर्ध्वबाहवः ॥ २०॥

ग्रीष्मे घर्मांशुसन्तप्ताः वर्षास्वाकाशगोचराः ।
शिवशब्दजपध्वस्तपापपञ्जरसुन्दराः ॥ २१॥

गोकर्णनिलयं मां हि ध्यायन्तो लिङ्गरूपिणम् ।
एवं संवसतां तेषां ज्ञानं दातुं महेश्वरि ॥ २२॥

तेषां पुरः प्रादुरासं नीलकण्ठोऽम्बिकायुतः ।
मां दृष्ट्वा ते मुनिगणाः प्रणम्य भुवि दण्डवत् ॥ २३॥

तुष्टुवुर्जयशब्दैश्च गोकर्णेशं मुनीश्वराः ।

—

मुनयः -
जय देव विरूपाक्ष जय भक्तार्तिभञ्जन ।
जयानन्त महादेव जय विश्वाधिक प्रभो ॥ २४॥

जयामरेशऽसर्वेश जय प्रमथनायक ।
जय शाश्वत सर्वज्ञ जय लिङ्गार्चकप्रिय ॥ २५॥

जय कालकलातीत जय शम्भो महेश्वर ।
जय शिष्टजनप्रीत जय श्रीकण्ठ शाश्वत ॥ २६॥

जयोग्र भीम कामारे जय लिङ्गस्थ शङ्कर ।
जय गङ्गाधराव्यग्र जय चन्द्रकलाधर ॥ २७॥

जय बिल्वदळप्रीत जय भीम प्रसीद नः ॥ २८॥

त्वं ब्राह्मणः सर्वसुरैर्विशिष्टः शिष्टेष्टपूज्यो भगवन्श्रुतिश्रुतः ।
वयं मनुष्यप्रवरा हि विप्रास्त्वामाश्रयामोऽखिलबन्धमुक्तत्यै ॥ २९॥

सुखाभासैर्धर्मैर्जनिमृतिनिदानादिनिवहैरविद्यां तीर्त्त्वैव प्रतिभवशतेषूत्तमधियः ।
असारं संसारं निरवधिककष्टैकजनकं मुहुर्निन्द्यं शम्भो विधिरहितबुध्या गतधियः ॥ ३०॥

लुठन्तो मोहान्धाः फलजनितकामाः सुखमये तथा स्वर्गे दुःखे नरकशतवैचित्र्यनिवहे ।
महेशं विश्वेशमखिलहृदयाब्जैकवसतिं न जानन्तो मोहाद्भवदभयभक्त्या विरहिताः ॥ ३१॥

—

ईश्वरः -
इत्थं संस्तुत्य ते सर्वे जयस्तुत्या तदाम्बिके ।
संसारजनकाज्ञाननिवर्तनकरं तदा ॥ ३२॥

विज्ञानं मां तदा प्रोचुर्देहेति परमेश्वरि ॥

—

मुनयः -

पशुपाशविमोचको भवान्पशवोऽज्ञानविजृम्भिता वयम् ।
भगवञ्शरणागतानथास्माञ्छिव तद्वद गुह्यमपि प्रभो मुदा ॥ ३३॥

भवपाशविमुक्तये पदं मनसः पारमतीव सौख्यदम् ।
यदि त्वत्करुणाकटाक्षलेशैः भवदीयैरभवाय जायते ॥ ३४॥

भवसागरतारकं वयं ते पदपद्मं प्रथमं समाश्रिताः ।
वद तन्नो दुरवाप्यमप्यवाप्तुं श्रुतिवर्यैर्निखिलं विमुक्तिदायिन् ॥ ३५॥

अतितुच्छमनोविलासितैः प्रथमानैर्जननादिदुःखदैः ।
विभवैरसुखाय कल्पितैः सुखबुद्ध्यैव भ्रमन्ति पामराः ॥ ३६॥

दारापत्यधनैश्च धान्यनिकरैः सद्धेमपट्टाम्बरै-
रश्वैर्गोमहिषैरजाविकगणैर्दन्त्युत्तमैः स्यन्दनैः ।
प्रासादैर्विविधैर्महोन्नततलैर्मञ्चैः पराध्यास्तृतैः
नानारत्नवरादिभूषणगणैराज्यैर्विमोहस्यहो ॥ ३७॥

—

ईश्वरः -
एवं प्रार्थयतां तेषां मुनीनां भावितात्मनाम् ।
तानब्रवमहं गौरि तद्ज्ञानं परमेश्वरि ॥ ३८॥

तल्लिङ्गदक्षिणाद्वक्त्रादघोरान्मूर्तिमान्स्थितः ।
तान्मुनीनुपदेष्टुं तद्ज्ञानं परमम्बिके ॥ ३९॥

पिशङ्गितजटाकुटीविधृतचन्द्रगङ्गानलोज्ज्वलन्निटिललोचनं वटतरोरधस्तात्स्थितम् ।
कटीतटमृगाजिनं कृतसुयोगपट्टोल्लसत्कराम्बुजमुमासखं गरलनीलकण्ठं शिवम् ॥ ४०॥

अपस्मृतिशिरःस्थितप्रकटपादफुल्लाम्बुजं विनिद्रघुसृणारुणोत्पलकरोत्थचिन्मुद्रिकम् ।
सुरासुरमुनिव्रजभ्रमदहार्दविध्वंसनं तमोगुणगणारुणप्रभुविदीप्तिविद्योतकम् ॥ ४१॥

मां तादृशं तदा देवि दक्षिणामूर्तिरूपिणम् ।
स्वाज्ञानविनिवृत्त्यर्थं तुष्टुवुर्मुनयोऽमलाः ॥ ४२॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे मुनिभिः कृता गोकर्णेशमीश्वरं शिवस्तुतिरेवं दक्षिणामूर्तिरूपस्य प्राकट्यम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः २५॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 25..

Notes:

Muni-s of the order of Vasishtha, Vamadeva, Vishwamitra, Angira, Bhardwaja, Gautama, Vyasa, Parashara et al; despite being well versed in Veda etc. shastras, worship Gokarnesham-Ishwara Shiva and perform austerities in search of ShivaGyana at Gokarna with much fervour and intensity. The Muni-s present to Shiva that they have been swaying in the ignorance like Pashu and pray that He grants them liberation from the Bhava-Pasha. As Shiva accepted their prayers; Aghora-mukha - the Southern face of the ShivaLinga, manifests in form of Dakshinamurty in order to satiate their quest.

The verses pertaining to Gyanopadesha by Dakshinamurty Shiva, follow in the same Chapter.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam*

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*